# संस्कृतवार्ताः

**दिनाङ्कः - 24.11.2024** **सायम् - 06:20**

## मुख्यवार्ताः

- प्रधानमन्त्री नरेन्द्रमोदी तकनीकि संबद्ध युवभिः वृद्धानां रक्षणार्थं अन्तर्जालीय छद्म प्रकल्पानां अवरोधनार्थं आह्वानं विहितवान् । उक्तं च यत् सर्वकारे डिजिटल-अरेस्ट्-इत्याख्यस्य कोऽपि प्रावधानः नास्ति इति।
- आकाशवाण्या: मन-की-बात इति कार्यक्रमं सम्बोधयन् प्रधानमन्त्री मोदी राजनीतिक इतर पृष्ठभूमिकात: यून: राजनीतिषु सम्मिलितुं आग्रहं कृतवान्। एकलक्षयुवकान् संयोजयितुं विशेषाभियानानि चालयिष्यन्ते इति उक्तम्।
- प्रधानमन्त्रिणा समुदीरितं यत् एनसीसी इत्याख्ये सङ्घे बालिकानां नामाङ्कनं पञ्चविंशतिःप्रतिशतमितात् प्रायः चत्वारिंशत्प्रतिशतं यावत् वर्धितमस्ति।
- शैत्यकालीन सत्रं श्व: आरभ्य दिसम्बरमासस्य विंशति: दिनांकं यावत् प्रचलेत्।

## अथ वार्ताः विस्तरेण

### पीएम-मन की बात

प्रधानमन्त्री नरेन्द्रमोदी तकनीकि संबद्ध युवभिः वृद्धानां रक्षणार्थं अन्तर्जालीय छद्म प्रकल्पानां अवरोधनार्थं आह्वानं विहितवान् । उक्तं च यत् सर्वकारे डिजिटल-अरेस्ट्-इत्याख्यस्य कोऽपि प्रावधानः नास्ति इति। मनकीबात इत्यस्य षोडशोत्तरैकशततमे प्रकरणे सम्बोधयन् प्रधानमन्त्री नरेन्द्र मोदी सबलं प्रतिपादितवान् यत् वृद्धाः बाला च अन्तर्जालीय छद्मप्रकल्पस्य सर्वाधिकाः ग्रसिताः सन्ति। तेषां सुरक्षा सर्वेषां दायित्वम् अस्ति।

श्रीमोदी घोषितवान् यत् आगामिवर्षे स्वामीविवेकानन्दस्य द्विषष्ठ्योत्तरद्विसहस्रतमवर्षस्य जन्मदिवसावसरे दिल्लीनगरे 'विकासभारतयुवानेतासंवादस्य आयोजनं भविष्यति। स्वामी विवेकानन्दस्य जन्मदिवसस्य स्मरणार्थं देशे प्रतिवर्षं जनवरी मासस्य द्वादश दिनाङ्के युवादिवसः आचर्यते। ग्राम-खण्ड-जनपद -राज्येभ्यश्च चिताः एतादृशाः सहस्रद्वयं युवकाः भारत-मण्डपमे संवादार्थं समागमिष्यन्ति।

प्रधानमन्त्री केषाञ्चन युवानां उदाहरणं दत्तवान् ये समाजाय निःस्वार्थभावेन कार्यं कुर्वन्ति, अन्येभ्य: अपि प्रेरणाम् यच्छन्ति ।

अद्यतनविदेशभ्रमणानां स्मरणं कुर्वन् प्रधानमन्त्री मोदी भारतीयमूलस्य जनाः भारतीयसंस्कृतेः संरक्षणे प्रचारे च सहाय्यं कुर्वन्ति इति अवदत्। गुयानादेशे एकः 'मिनी इण्डिया' निवसति इति तथ्यं निर्दिश्य श्री मोदी उक्तवान् यत् गुयानादेशे भारतीयमूलस्य जनाः प्रत्येकस्मिन् क्षेत्रे देशस्य नेतृत्वं कुर्वन्ति।

श्री मोदी इत्यनेन उक्तं यत् प्रथमवारं उपनिषदानां स्लोवाकभाषायां अनुवादः विहितः। प्रधानमन्त्रिणा उक्तं यत् भारतस्य प्राचीन सागरीय क्षमतया सम्बद्धानां प्रमाणानां संरक्षणार्थं देशे अपि अभियानं प्रचलति।

प्रधानमन्त्री मोदी उक्तवान् यत् “एक पेड़ माँ के नाम” अभियानेन केवलं पञ्चमासेषु एव शतकोटिवृक्षरोपणस्य महत्त्वपूर्णं कार्यं सञ्जातम् । अस्मिन् अभियाने देशस्य सर्वेभ्यः भागेभ्य: जनाः भागं गृहीतवन्तः इति ज्ञात्वा प्रधानमन्त्री प्रसन्नः अभवत् ।

**विरामः**

**संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।**

**पीएम-सम्मेलनम्**

प्रधानमन्त्री नरेन्द्रमोदी श्वः नवदिल्ल्याः भारतमण्डपे अन्तार्राष्ट्रीय-सहकारीगठबन्धनस्य वैश्विकसहकारीसम्मेलनस्य उद्घाटनं विधास्यति। अवधेयास्पदं वर्तते यत् भारते तावत् इदं सम्मेलनं प्रथमं वारं आयोज्यते। अवसरेऽस्मिन् श्रीमोदी पञ्चविंशत्युत्तर द्विसहस्रतमवर्षस्य अन्तार्राष्ट्रीयसहकारीवर्षस्य स्मारक डाकपत्रस्य विमोचनं विधास्यति। प्रायः त्रिसहस्राधिकाः प्रतिनिधयः कार्यक्रमेऽस्मिन् भागं गृह्णन्ति।

**संसद सत्र**

संसदीय कार्यमन्त्री किरेन रिजिजु इत्यनेन उक्तं यत् श्वः आरभ्य संसदः शिशिरसत्रे कस्यापि विषये चर्चां कर्तुं सर्वकारः सज्जः अस्ति। नवदिल्ल्यां सर्वदलीयोपवेशनानन्तरं पत्रकारैः सह वदन् रिजिजुमहोदयः विपक्षदलेभ्यः आग्रहं अकरोत् यत् ते सत्रस्य समये लोकसभायाः राज्यसभायाः च सुचारूरूपेण कार्यं सुनिश्चितं कुर्वन्तु इति। सर्वदलीयसभायाः अध्यक्षत्वं रक्षामन्त्री राजनाथसिंह विहितवान्। अस्मिन् उपवेशने अनुप्रिया पटेलः, एल-मुरूगन, सस्मित पात्रा, रामगोपाल यादवः, प्रमोद तिवारी, जयराम-रमेशः च उपस्थिताः आसन्। सत्रमिदं श्वः आरभ्य दिसम्बरमासस्य विंशतिः दिनांकं यावत् प्रचलेत्।

**इफ्फी**

अद्य पञ्च पञ्चाशततमे अन्तार्राष्ट्रीय-चलच्चित्रमहोत्सवे 'क्रिएटिव् माइण्डस् ऑफ् टुमारो, (सी.एम.ओ.टी') इत्यस्य परिणामाः समुद्घोषिताः। समूह ग्रीन इत्यस्य गुल्लु चलच्चित्रं सर्वश्रेष्ठचलच्चित्रपुरस्कारं विजितवत्। तदर्थं हि इत्यस्मै पञ्चलक्षरूप्यकाणां पुरस्कारो प्रदत्तः। अस्यैव चलच्चित्रस्य पुष्पेन्द्रकुमारः सर्वश्रेष्ठ नायकस्य पुरस्कारं प्राप्तवान्। 'लवफ्लिक्स सब्सक्रिप्शन' इति चलच्चित्रस्य विशाखा नायर सर्वश्रेष्ठा नायिकायाः पुरस्कारं प्राप्तवती।

**ओडिशा-पर्व**

प्रधानमन्त्री नरेन्द्र मोदी नवदिल्ल्यां अद्य सायंकाले 'ओडिशा पर्व्' इत्यस्मिन् कार्यक्रमे भागं गृह्णीयात्। जनान् च असौ तत्र सम्बोधयेत्। ओडिशा रिक्थस्य संवर्धनाय संरक्षणाय ओडिशा पर्व नवंबर मासस्य द्वाविंशतिः दिनाङ्कतः चतुर्विंशति दिनाङ्कं यावत् आयोज्यते। एतस्मिन् वर्षे ओडिशा राज्यस्य समृद्ध रिक्थस्य विविधवर्णयुतानां सांस्कृतिक रूपाणां प्रदर्शन पुरस्सरं राज्यस्य सामाजिकं, सांस्कृतिकं, राजनीतिकं च लोकाचारं प्रदर्शितम् जायते। अद्य ओडिशा पर्व इत्यस्य समापनं जायते इति अवधातव्यम्।

**राष्ट्रपति-गुरूतेग**

राष्ट्रपतिः द्रौपदी मुर्मुः, उपराष्ट्रपतिः जगदीपधनखडः च अद्य हुतात्मदिवसमुपलक्ष्य गुरूतेगबहादुरं प्रति श्रद्धाजलिं समर्पितवन्तौ। एकस्मिन् सामाजिक अन्तर्जालीय पटले राष्ट्रपतिः अब्रवीत् यत् गुरूतेग बहादुरः एकः महान् आध्यात्मिक मार्गदर्शकः, सत्यनिष्ठ देशभक्तः च आसीत्। यः प्रेमस्य एकतायाः भावनां सुदृढीकृतवान्। उपराष्ट्रपतिः अवोचत् यत् मानवतायाः मौलिकाधिकाराणां संरक्षणार्थं तस्य अद्वितीयं योगदानमस्ति।

**।।इति वार्ताः।।**